संस्कृत वार्ताः

दिनाङ्कः- 26.06.2026 प्रातः - 06:55

## अथ वार्ताः

### प्रधानमन्त्री-राज्ञी मेक्सिमा

प्रधानमन्त्री नरेन्द्र मोदी ह्यः नवदिल्ल्यां, संयुक्तराष्ट्रसङ्घस्य महासचिवस्य वित्तीयस्वास्थ्यस्य विशेष-अधिवक्त्रा नीदरलैण्ड्देशस्य राज्ञ्या मेग्सिमा इत्यनया सह मिलितवान् । सामाजिक-माध्यम-सन्देशे श्रीमोदिना उक्तं यत्, भारतस्य डिजिटल-क्रान्तिः वित्तीयसेवानाम् सारल्यं कृत्वा, कथं सामान्यजनानां 'जीवनस्य सुगमतां' वर्धयति, जनान् सशक्तं च करोति इत्यस्मिन् विषये द्वयोः मध्ये चर्चा अभवत् ।

### प्रधानमन्त्री-सेशेल्स्

प्रधानमन्त्री श्रीनरेन्द्र-मोदी श्वः आरभ्य ऊनत्रिंशत् दिनांक-पर्यन्तं सेशेल्स्-देशस्य राजनैतिक-यात्रायां भविष्यति । सः तत्र सेशेल्स्-देशस्य राष्ट्रिय-दिवसस्य स्वर्णजयन्ती-उत्सवे अतिथिरूपेण भागं ग्रहीष्यति । इतः पूर्वं प्रधानमन्त्रिणा पञ्चदशोत्तर-द्विसहस्र-तमे वर्षे सेशेल्स्-देशस्य भ्रमणं कृतम् आसीत् । विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् भारतीयरक्षाबलानाम् एकं दलं, भारतीयनौसेनायाः द्वाभ्यां नौकाभ्यां सह उत्सवे भागं गृह्णीयात् । यात्रा-समये प्रधानमन्त्री सेशेल्स्-देशस्य राष्ट्रपतिना डॉ. पैट्रिक हर्मिनी इत्यनेन सह वार्तालापं करिष्यति, द्विपक्षीयसहकार्यस्य सम्पूर्ण-समीक्षां करिष्यति, अथ च परस्परहितस्य क्षेत्रीय-अन्ताराष्ट्रिय-विषयेषु च विचाराणां आदान-प्रदानं करिष्यति। प्रधानमन्त्री सेशेल्स्-देशस्य राष्ट्रियसभायाः सम्बोधनं च करिष्यति, प्रवासी-भारतीयैः सहापि संवादं करिष्यति ।

### अमित-शाहः

केन्द्रीय गृहमंत्री अमित शाहः अद्य नवदिल्ल्यां नार्को-समन्वयकेन्द्रे दशम-शीर्षस्तरीय-संगोष्ठ्याः अध्यक्षतां करिष्यति ।

मादक-द्रव्य-नियन्त्रण-अभिकरण-द्वारा आयोजितेऽस्मिन् सत्रे केन्द्रीयमन्त्रालयानाम्, राज्यसर्वकाराणां, मादक-द्रव्य-विधि-प्रवर्तन-संस्थानां च प्रतिनिधयः एकत्रिताः भविष्यन्ति, येन, देशे सर्वत्र मादकद्रव्यव्यापारस्य, मादकद्रव्यस्य दुरुपयोगस्य च निवारणार्थं प्रयत्नानाम् समीक्षायाः सुदृढीकरणं च भविष्यति। अस्मिन् अवसरे श्रीशाहः मादक-द्रव्य-नियन्त्रण-विषयं अग्रिम-कार्य-योजन-प्रतिवेदनं विमोचयिष्यति ।

### गोयल-एफटीए-यूके

वाणिज्य-उद्योगमन्त्री पीयूषगोयलः अवदत् यत् भारत-यूके-व्यापक-आर्थिक-व्यापार-सन्धिः वैश्विक-अर्थव्यवस्थायाः समर्थनाय, बल-गुणकस्य कार्यं करिष्यति। ह्यः लन्दन-नगरे भारतवैश्विकमञ्चस्य यूके-भारतसप्ताहं सम्बोधयन् श्रीगोयलः अवदत् यत् यूनाइटेड् किङ्ग्डम्-देशेन सह कृत-मुक्तव्यापारसन्धिः, अद्यावधि भारतस्य सर्वाधिक-व्यापक-सन्धिःअस्ति।

### एन्.टि.ए

अस्मिन् मासे एकविंशति-दिनाङ्के आयोजितायाः नीट्-यूजी पुनः परीक्षायाः अस्थायी उत्तरकुंजीनाम् दर्शनार्थम्, प्रश्नान् आव्हानं कर्तुं च राष्ट्रिय-परीक्षण-संस्थायाः गवाक्षम् उद्घाटितम् अस्ति। एनटीए इत्यनेन घोषितं यत् उत्तरकुंजिका www.neet.nta.in इत्यत्र उपलभ्यते। छात्राः अस्य मासस्य अष्टाविंशतिः-दिनाङ्कपर्यन्तं प्रतिप्रश्नं, द्विशतरूप्यकशुल्कं दत्वा प्रश्नान् आव्हानं कर्तुं शक्नुवन्ति। यदि आव्हानं स्वीकृतं भवति तर्हि एतत् शुल्कं पूर्णतया प्रतिदेयम् भवति।

**एलपीजी आपूर्तिः**

सर्वकारेण औद्योगिक-व्यापारिक-द्रव-अनिल-ईन्धनस्य आपूर्तिविषये सर्वाणि क्षेत्रीयप्रतिबन्धानि दूरीकृत्य, पश्चिम-एशिया-संकटात् पूर्वं प्रचलितस्तरं यावत् आपूर्तिम् पुनः स्थापितम् अस्ति ।

**वेनेजुएला भूकम्पः**

वेनेजुएला देशस्य कार्यवाहकराष्ट्रपतिः जॉर्ज रोड्रीग्जः घोषितवान् यत् द्वयोः शक्तिशालि-भूकम्पयोः मध्ये मृतानां संख्या अष्टाशीत्युत्तर-एकशतम् अभवत् । सहस्रशः जनाः घातिताः, द्विशताधिकाः जनाः अद्यापि भूकम्पग्रस्त-प्रदेशे एव परिलग्नाः सन्ति । अधुना रोड्रीग्जः आपत्कालस्य घोषणां कृतवान् अस्ति। कार्यवाहकराष्ट्रपतिः रोड्रीग्जः भूकम्पानाम् अनन्तरं भारतस्य सहानुभूतिं स्वीकृतवान् । अस्मिन् कठिनसमये सः प्रधानमन्त्रिणः नरेन्द्रमोदिनः टिप्पण्याः स्वागतं कृतवान् यस्मिन् श्रीमोदी शोकसंवेदनां प्रकटितवान्, भूकम्पस्य तीव्रपरिणामानां पश्चात् आपदुद्धार-प्रयासानां समर्थनं कर्तुं भारतस्य इच्छां च प्रकटितवान् ।

।।इति वार्ताः।।